**This Question Paper consists 42 questions and 8 printed pages.**
**अस्मिन् प्रश्नपत्रे 42 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति ।**

**Roll No.**
**अनुक्रमाङ्कः** | | | | | | | | | | | | |

**Code No. 62/S/N/S**
**कूट सं.**
**Set No. - A**

# SANSKRIT
# संस्कृतम्
# (209)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of Invigilators** **1.** ____________________
**(निरीक्षकयोः हस्ताक्षरम्)**
**2.** ____________________

**सामान्य अनुदेशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति ।

3 वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।

4 वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

5 उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

6 स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **62/S/N/S - A** अवश्यं लेखनीया ।



UNNATI EDUCATIONS
9899436384, 9654279279

# SANSKRIT

# संस्कृतम्

# (209)

**समयः होरात्रयम्]** **[पूर्णाङ्काः : 100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति ।

**(2)** प्रत्येकम् प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

**खण्ड – क**

1 एकदा बोपदेवः ________ उपविश्य महिलाम् अपृच्छत् । **1**

(A) शिलाखण्डे (B) कूपे

(C) नदीतीरे (D) विद्यालये

2 मकरस्य भार्या कं स्मरति ? **1**

(A) गृहम् (B) मकरम्

(C) जंबुफलम् (D) वानरम्

3 प्रथमं शरीरात् का निर्गता ? **1**

(A) चक्षुः (B) वाक्

(C) मनः (D) श्रोत्रम्

4 यदि आयुः क्षयोऽस्ति तद् ________ भविष्यत्येव । **1**

(A) जीवनम् (B) पतनम्

(C) जन्म (D) मृत्युः

5 एकदा बोधिसत्त्वः ________ अधिपः अभवत् । **1**

(A) असुराणाम् (B) देवानाम्

(C) दैत्यानाम् (D) दीनानाम्

6 भारतवर्षे ________ 'भास्कर' इति उपग्रहयानं निर्मितम् । **1**

(A) वैज्ञानिकैः (B) शास्त्रज्ञैः

(C) दैवज्ञैः (D) गणितज्ञैः



**UNNATI EDUCATIONS**
**9899436384, 9654279279**

7 विद्या ________ रक्ष्यते । 1

(A) सत्येन (B) योगेन

(C) वृत्तेन (D) वित्तेन

8 बोपदेवः महिलां पृच्छति इत्यत्र पृच्छति पदे कः लकारः ? 1

(A) लोट् (B) लङ्

(C) लट् (D) लृट्

9 'त्रयाणां मत्स्यानाम्' इत्यत्र 'त्रयाणाम्' पदस्य मूलशब्दः कः ? 1

(A) त्रयस् (B) त्रय

(C) त्रि (D) त्रै

10 रिक्तस्थाने किं भविष्यति ? सर्वतः ________ आदद्यात् । 1

(A) सारम् (B) संसारम्

(C) विहारम् (D) निहारम्

11 (i) पम्पा कीदृशी आसीत् ? 1+1=2

(ii) तत्र रामः कया विहीनः विललाप ?

12 (i) शक्रः रथस्य अग्रे आगतानि कानि पश्यति ? 1+1=2

(ii) दौवारिकः दुर्गाध्यक्षसमीपे कं नेतुम् इच्छति ?

13 (i) मकरः कस्य मरणम् न इच्छति ? 1+1=2

(ii) देवेन्द्रस्य रथं विलोक्य के भयाकुलाः अभवन् ?

14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नान् उत्तरत – 1×3=3

कुमारौ – (अन्योन्यमुद्दिश्य) यं निरीक्ष्यैव ममांगेषु आलिंगनस्य अभिलाषउत्पद्यते तत्कथं मृदुशरीरेऽस्मिन् शराः मोक्तव्याः ?

चन्द्रकेतुः – अवतराम्यार्य । स्यन्दनात् ।

सुमन्त्रः – कस्य हेतोः ?

चन्द्रकेतुः – एकस्तावदयं वीरपुरुषः पूजितो भवति, अपिच आर्य । क्षात्रधर्म परिपालितो भवति ।

सुमन्त्रः – शोभनंवत्स ।

एष सांग्रामिको न्यायः एष धर्मः सनातनः ।<br>इयं हि रघुसिंहानां वीरचारित्रपद्धतिः ॥

**प्रश्नाः –**

(i) स्यन्दनात् कः अवतरति ?

(ii) किमर्थं स्यन्दनात् अवतरति ?

(iii) केषाम् वीरचारित्र पद्धतिः अस्ति ?



UNNATI EDUCATIONS
9899436384, 9654279279

15 कस्यचित् एकस्य चरित्रचित्रणं पंचवाक्येषु संस्कृतेन कुरुत – 1×5=5

कण्वः **अथवा** पशुपक्षिणां वर्णनम्

16 प्रश्नान् उत्तरत – 1+1=2

(i) कुलं केन रक्ष्यते ?

(ii) भरद्वाजस्य आश्रमः कस्याः नद्याः तीरे आसीत् ?

17 (i) असाधुः कीदृशः स्मृतः ? 1+1=2

(ii) प्रत्युपकाराय दत्तं दानं कीदृशं भवति ?

18 ईशावास्यमिदं सर्वं यत् किञ्चजगत्यां जगत ।

तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद् धनम् ॥ 1+1=2

(i) जगत् केन व्याप्तम् अस्ति ?

(ii) मानवेन कथं भोक्तव्यम् ?

19 भूमिदानेन ये लोका गोदानेन च कीर्तिताः । 1+1=2

ते लोकाः प्राप्यन्ते पुंमिः पादपानां प्ररोहणे ॥

(i) लोकाः केन कीर्तिताः ?

(ii) पुंमिः ते लोकाः कस्मिन् प्राप्यन्ते ?

20 अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत – 1×3=3

यदि तव वसनं धूसरितं स्यात् यदि च सहस्त्रच्छिद्रं स्यात् ।

का वाक्षतिरिहतेन भवेत्ते तत्वमिदं चिन्तय चित्ते ॥

(i) 'वसनम्' इति पदस्य कः अर्थः ?

(ii) कीदृशं वस्त्रं हानिप्रदं न स्यात् ?

(iii) जर्जरितवसनेषु अपि कः तिष्ठति ?

21 निम्नलिखित श्लोकस्य अन्वये रिक्तस्थानपूर्तिं कुरुत – 1×3=3

एषा सा दृश्यते सीते, राजधानी पितुर्मम ।

अयोध्यां कुरुवैदेहि प्रणामं पुनरागता ॥

अन्वयः –

सीते एषा सा मम ________, राजधानी (अयोध्या)

दृश्यते, हे वैदेहि पुनः आगता त्वम् ________ प्रणामं ________ ।



UNNATI EDUCATIONS
9899436384, 9654279279

22 रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1+1=2

(i) <u>संन्यासी</u> तुरीयाश्रमसेवी अस्ति ।

(ii) <u>प्राणः</u> इन्द्रियेषु श्रेष्ठः ।

23 कः कम्प्रति कथयति ? 1+1=2

(i) आर्य, त्वर्यताम् । अस्मद्रथं तत्रैवनयतु ।

(ii) आयुष्मन्, एष प्राप्ताः वयम् । पश्यतु तत्रास्ति लवः ।

24 तामसं भोजनं कीदृशम् भवति । 1+1=2

25 अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत – 1×3=3

पुण्यापुण्यैस्तथा गंधैर्धूपैश्च विविधैरपि ।

अरोमाः पुष्पिताः संति तस्माज्जिघ्रंति पादपाः ॥

(i) पादपाः किं कुर्वन्ति ?

(ii) 'पुण्यापुण्यैः' इति पदम् कस्य विशेषणम् ?

(iii) वृक्षाः कैः जिघ्रन्ति ?

26 अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत – 1×3=3

मनःशौचं कर्मशौचं कुलशौचं च भारत ।

शरीरशौचं वाक्छौचं, शौचं पंच विधं स्मृतम् ॥

(i) 'शौचम्' इति पदस्य कः अर्थः ?

(ii) शरीरस्य शौचं केन भवति ?

(iii) शौचं कतिविधं स्मृतम् ?

27 कस्यचित् एकस्य पाठस्य सारांशं पंचवाक्येषु लिखत – 1×5=5

त्याज्यं न धैर्यम्

करुणा परा हि साधवः

कर्तव्यनिष्ठा



UNNATI EDUCATIONS
9899436384, 9654279279

## खण्ड – ख
## (अनुप्रयुक्त व्याकरणम्)

**28** अधोलिखितेषु कण्ठ्यवर्णौ चित्वा लिखतः – **1+1=2**

ह क ट ज य श

**29** रेखांकितेषु सन्धिच्छेदं कृत्वा संधिनाम लिखतः – **1×3=3**

अभिवादनशीलस्य नित्य <u>वृद्धोपसेविनः</u> ।

चत्वारि तस्य वर्धन्ते <u>आयुर्विद्या</u> <u>यशोबलम्</u> ॥

**30** संधिं कुरुत – **1+1=2**

कः + अपि । कालदेशः + उपपन्नानि ।

**31** रेखांकितपदयोः कः मूलशब्दः का च विभक्तिः ? **1+1=2**

अद्य <u>मम</u> <u>गृहे</u> तव भोजनम् अस्ति ।

**32** रिक्तस्थानेषु अंकानां स्थाने संख्यावाचकानि पदानि लिखतः – **1×3=3**

(i) सिंहद्वारे ___(1)___ दौवारिकः तिष्ठति ।

(ii) विद्यालये ___(7)___ अध्यापिकाः सन्ति ।

(iii) त्वं तस्मै ___(3)___ फलानि देहि ।

**33** रेखांकितपदे कः धातुः कश्चलकारः ? **1+1=2**

(i) कन्या रुदती प्रस्थानं <u>करोति</u> ।

(ii) लताः अश्रूणि <u>मुञ्चन्ति</u> ।

**34** रेखांकितपदयोः कः मूलशब्दः का च विभक्तिः ? **1+1=2**

<u>शक्रः</u> <u>करुणाम्</u> आपन्नः उवाच ।



UNNATI EDUCATIONS
9899436384, 9654279279

35 अधोलिखितयोः समस्तपदयोः विग्रहं लिखतः – 1+1=2

राजलक्ष्मीः । विद्याध्ययनम् ।

36 अधोलिखितविग्रहाणां कृते समस्तपदं लिखत – 1+1=2

(i) भावानां संशुद्धिः ।

(ii) दैवेन रक्षितम् ।

37 रिक्तस्थाने किं पदं भविष्यति ? 1+1=2

(i) तत्र सः गृहं __________ (निर् + मा + क्तवतु)

(ii) गुरोः वाक्यं __________ स व्यरमत् (श्रु + क्त्वा)

38 रिक्तस्थानपूर्तिं कुरुत – 1×3=3

(i) जम्बुवृक्षः __________ पूरितः । (फल)

(ii) छात्रः __________ विद्यालयं गच्छति । (पठन)

(iii) भ्रमराः __________ गुञ्जन्ति । (पुष्प)

## खण्ड – ग

## (रचनाकौशलम्)

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत – 1×5=5

सताम् आचारः सदाचारः । सज्जनाः यथा आचरन्ति सः सदाचारः । मातापित्रोः शुश्रूषा, तेषाम् आज्ञापालनं, सत्यभाषणं, भूतेषु दया अहिंसा, क्षमा, अस्तेयम्, परोपकारः आदयः सदाचारस्य अंगानि मन्यन्ते ।

सदाचारीजनः सदा सर्वत्र समादरं लभते । सदाचारकारणात् तस्यबुद्धिः प्रखरतां याति । इन्द्रियाणाम् उपरि संयमः जायते । कदापि पापकर्मणि प्रवृत्तिः न भवति । लोकहिताय सः यतते । अतएव आचारः परमो धर्मः कथ्यते ।

**प्रश्नाः –**

(i) सज्जनानाम् आचरणं किं कथ्यते ?

(ii) सदाचारी समादरं कुत्र लभते ?

(iii) कस्मिन् कार्ये सदाचारिणः प्रवृत्तिः न भवति ?

(iv) 'सम्मानम्' इत्यर्थे अनुच्छेदे कः शब्दः प्रयुक्तः ?

(v) 'धर्मः' इति पदस्य विशेषणं किम् ?



UNNATI EDUCATIONS
9899436384, 9654279279

**40** अधोलिखित विषयमधिकृत्य मञ्जूषापदसहायतया एकम् अनुच्छेदम् लिखत – **1×5=5**

परोपकारः

| मञ्जूषा |
| --- |
| उपकारः परेषाम् स्वार्थं त्यक्त्वा अन्येषां हिताय क्रियते वृक्षा नद्यः फलन्ति वहन्ति परोपकारिणः स्वदुःखानि विस्मृत्य उपकारे रताः ते क्षुधार्तेभ्यः भोजनं, वस्त्रहीनेभ्यः वस्त्राणि, अशितेभ्यः विद्यां प्रयच्छन्ति, उत्तमाः पुरुषा परोपकारिणः |

**41** भवान् मुदितः । दीपमालिकायाः अवसरे ज्येष्ठभगिन्यै एकं पत्रं, मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा, लिखतु । **1×5=5**

दिल्लीतः

तिथि :______

आदरणीये भगिनि,

सादरं प्रणमामि ।


प्रकाशस्य __(i)__ भवतीनां सर्वेषां __(ii)__ __(iii)__ समृद्धिं आरोग्यं च __(iv)__ इति अहं __(v)__ ।

भवत्याः अनुजः

मुदितः

| मंजूषा |
| --- |
| उत्सवः जीवने सुखं पूरयेत् कामये |

**42** अधोलिखितं चित्रं दृष्ट्वा मंजूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत – **1×5=5**



| मञ्जूषा |
| --- |
| तत्र स्तः द्वौ वृक्षौ, छात्राः पठति पुस्तकं महिला कूपात् निष्कासयति जलम् नाविकः नद्यां नौकां वाहयति । कृषकः हलं कर्षति । |



UNNATI EDUCATIONS
9899436384, 9654279279